
# ಶ್ರೀಮದಾನನ್ದತೀರ್ಥಭಗವತ್ಪಾದಾಚಾರ್ಯಃ




Tracking:

| Sr | Date | Remarks | By |
|---|---|---|---|
| 1 | 15/02/2012 | **Typing Started on** | **H K Srinivasa Rao** |
| 2 | 15/12/2012 | **Typing Ended on** | **H K Srinivasa Rao** |
| 3 | 27/02/2012 | **First Proof Reading** | **M S Venugopal** |
| 4 | 27/02/2012 | **Started first proof Correction** | **H K Srinivasa Rao** |
| 5 | 27/02/2012 | **Finished first proof correction** | **H K Srinivasa Rao** |
| 6 | 30/08/2013 | **Published** | **H K Srinivasa Rao** |

# ॥ ಶ್ರೀ ಹಯವದನ ರಂಗವಿಠ್ಠಲ ಗೋಪೀನಾಥೋ ವಿಜಯತೇ ॥

*Blessed by Lord and with His divine grace, we are pleased to publish this Magnanimous Work of sri Acharya Madhwa. It is a humble effort to make available this Great work to sadhakas who are interested in the noble path of propagating Acharya Madhwa's Philosophy.*

*With great humility, we solicit the readers to bring to our notice any inadvertant typographical mistakes that could have crept in, despite great care. We would be pleased to incorporate such corrections in the next versions. Users can contact us, for editable version, to facilitate any value additions.*

*Contact: H K SRINIVASA RAO, N0 26, 2ND FLOOR, 15TH CROSS, NEAR VIDHYAPEETA CIRCLE, ASHOKANAGAR, BANGALORE 560050. PH NO. 26615951, 9901971176, 8095551774, skype Id: SRKARC6070*

*Email :* **srkarc@gmail.com**

## ಕೃತಜ್ಞತೆಗಳು



ಜನ್ಮಾಂತರದ ಸುಕೃತದ ಫಲವಾಗಿ ಮಧ್ವಮತದಲ್ಲಿ ಜನಿಸಲು, ಪ್ರೇಮಮೂರ್ತಿಗಳಾಗಿ ನನ್ನ ಅಸ್ತಿತ್ವಕ್ಕೆ ಕಾರಣರಾದ, ಈ ಸಾಧನೆಗೆ ಅವಕಾಶಮಾಡಿದ, ನನ್ನ ಪೂಜ್ಯ ಮಾತಾ ಪಿತೃಗಳಾದ, ದಿವಂಗತರಾದ ಲಲಿತಮ್ಮ ಮತ್ತು ಕೃಷ್ಣರಾವ್ ಹೆಚ್ ಆರ್ ಅವರ ಸವಿ ನೆನಪಿನಲ್ಲಿ ಈ "ಸರ್ವಮೂಲ ಯಜ್ಞ"

''ಮಾತೃದೇವೋ ಭವ-ಪಿತೃದೇವೋಭವ-ಆಚಾರ್ಯದೇವೋಭವ''

ಗ್ರಂಥ ಋಣ:ಆಚಾರ್ಯ ಪ್ರಭಞ್ಜನರಿಂದ ಪ್ರಕಾಶಿತವಾದ ಸರ್ವಮೂಲ ಗ್ರಂಥಗಳು

# ॥ ईशावास्योपनिषद्भाष्यम् ॥

नित्यानित्यजगद्धात्रे नित्याय ज्ञानमूर्तये।
पूर्णानन्दाय हरये सर्वयज्ञभुजे नमः ॥
यस्माद्ब्रह्मेन्द्ररुद्रादिदेवतानां श्रीयोऽपि च।
ज्ञानःस्पूर्तिः सदा तस्मै हरये गुरवे नमः ॥

स्वायम्भुवो मनुरेतैर्मन्त्रैर्भगवन्तमाकूतिसूनुं यज्ञनामानं विष्णुं तुष्टाव -

‘स्वायम्भुवः स्वदौहित्रं विष्णुं यज्ञाभिदं मनुः।
ईशावास्यादिभिर्मन्त्रैस्तुष्टावावहितात्मना ॥
रक्षोभिरुग्रैः सम्प्राप्तः खादितुं मोचितस्तदा।
स्तोत्रं श्रुत्वै यज्ञेन तान् हत्वाऽवध्यतां गतान् ॥
प्रादाद्धि भगवांस्तेषामवध्यत्वं हरः प्रभुः।
तैर्वध्यत्वं तथाऽन्येषामतः कोऽन्यो हरेः प्रभुः ॥’ इति ब्रह्माण्डे

भागवते चायमर्थ एव उक्तः।

## ईषावास्योपनिषत्

ईशावास्यमिदं सर्वं यत् किञ्च जगत्यां जगत्।
तेन त्यक्तेन भुञ्जीथा मा गृधः कस्यस्विद् धनम् ॥ 01 ॥

भाष्यम् - ईशस्यावासयोग्यमीशावास्यम्। जगत्यां -प्रकृतौ। तेन ईशेन त्यक्तेन - दत्तेन भुञ्जीथाः।

"स्वतः प्रवृत्त्यशक्तत्वादीशावास्यमिदं जगत्।
प्रवृत्तये प्रकृतिगं यस्मात् स प्रकृतीश्वरः।
तदधीनप्रवृत्तित्वात् तदीयं सर्वमेव यत्।
तद्दत्तेनैव भुञ्जीथा अतो नान्यं प्रयाचयेत्।" इति ब्राह्मे ॥01॥

कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः।

एवं त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नरे ॥ 02 ॥

भा- अकुर्वतः कर्म न लिप्यते इति नास्ति।

'अज्ञस्य कर्म लिप्येत कृष्णोपास्तिमकुर्वतः।

ज्ञानिनोऽपि यतो ह्रास आनन्दस्य भवेद् ध्रुवम्।

अतोऽलेपेऽपि लेषः स्यादतः कार्यैव सा सदा ॥' इति नारदीये ॥02॥

असुर्या नाम ते लोका अन्धेन तमसाऽऽवृताः।

तांस्ते प्रेत्याभिगच्छन्ति ये के जात्महनो जनाः ॥ 03 ॥

भा- सष्ठु रमणविरुद्धत्वादसुराणां प्राप्यत्वाच्चासुर्याः।

"न च रमन्त्यहो असदुपासनयाऽऽत्महनः" इत्युक्तत्त्वात्।

"महादुःखैकहेतुत्वात् प्राप्यत्वादसुरैस्तथा।

असुर्या नाम ते लोकास्तान् यान्ति विमुखा हरौ ॥ " इति वामने।

ये के चेत्यनेन नियम उक्तः।

'नियमेन तमो यान्ति सर्वेऽपि विमुखा हरौ।' इति च ॥ 03 ॥

अनेजदेकं मनसो जवीयो नैनद् देवा आप्नुवन् पूर्वमर्षत्।

तद् धावतोऽन्यानत्येति तिष्ठत् तस्मिन्नपो मातरिश्वा दधाति ॥ 04 ॥

भा- "अनेजन्नर्भयत्वात् तदेकं प्राधान्यतस्तथा।

सम्यग् ज्ञातुमशक्यत्वादगम्यं तत् सुरैरपि ॥

स्वयं तु सर्वानगमत् पूर्वमेव स्वभावतः।

अचिन्त्यशक्तितश्चैव सर्वगत्वाच्च तत्परम् ॥

द्रवतोऽत्येति सन्तिष्ठन् तस्मिन् कर्माण्यधान्मरुत्।

मारुत्येव यतश्चेष्टा सर्वा तां हरयेऽर्पयेत् ॥ "

इति ब्रह्माण्डे। ऋष-ज्ञाने ॥ 04 ॥

तदेजति तन्नैजति तद् दूरे तद्वन्तिके।

तदन्तरस्य सर्वस्य तदु सर्वस्य बाह्यतः ॥ 05 ॥

भा- तदेजति तत एव एजत्यन्यत्। तत् स्वयं नेजति।

" ततो बिभेति सर्वोऽपि न बिभेति हरिः स्वयम्।

सर्वगत्वात् स दूरे च बाह्येऽन्तश्च समीपगः ॥ "

इति तत्त्व संहितायाम् ॥ 05 ॥

यस्तु सर्वाणि भूतान्यात्मन्येवानुपश्यति।

सर्वभूतेषु चात्मानं ततो न विजुगुप्सते ॥ 06 ॥

भा- "सर्वगं परमात्मानं सर्वं च परमात्मनि।

यः पश्येत् स भयाभावान्नात्मानं गोप्तुमिच्छति ॥"

इति सौकरायणश्रुतिः ॥ 06 ॥

यस्मिन् सर्वाणि भूतान्यात्मैवाभूद् विजानतः।

तत्र को मोहः कः शोक एकत्वमनुपश्यतः ॥ 07 ॥

भा - यस्मिन् - परमात्मनि,सर्वभूतानि स परमात्मैव तत्र सर्वभूतेष्वभूत्। एवं सर्वभूतेष्वेकत्वेन परमात्मानं विजानतः को मोहः ?

'यस्मिन् सर्वाणि भूतानि स आत्मा सर्वभूतगः।

एवं सर्वत्र यो विष्णुं पश्येत् तस्य विजानतः।

को मोहः कोऽथवा शोकः स विष्णुं पर्यगाद्यतः ॥'

इति पिप्पलादशाखायाम्

पूर्वोक्तानुवादेन शोकमोहाभावो विजानतश्चात्त्रोच्यते। अभ्यासश्च सर्वगतत्वस्य तात्पर्यद्योतनार्थः ॥ 07 ॥

स पर्यगाच्छुक्तमकायमव्रणमस्नाविरं शुद्धमपापाविद्धम्।

कविर्मनीषी परिभूः स्वयं भूर्याथातथ्यतोऽर्थान् व्यदधाच्छाश्वतीभ्यः समाभ्यः

॥ 08 ॥

भा- 'शुक्रं तच्छोकराहित्यादव्रणं नित्यपूर्णतः।

पावनत्वात् सदा शुद्धमकायं लिङ्गवर्जनात्।

स्थूलदेहस्य राहित्यादस्नाविरमुदाहृतम् ॥

एवंभूतोऽपि सार्वज्ञात् कविरित्येव शब्यते।

ब्रह्मादिसर्वमनसां प्रकृत्या मनसोऽपि च ॥

ईशितृत्वान्मनीषी स परिभूःसर्वतोवरः।

सदाऽनन्याश्रयत्वाच्च स्वयम्भूः परिकीर्तितः ॥

स सत्यं जगदेतादृङ् नित्यमेव प्रवाहतः ॥

अनाद्यनन्तकोलेषु प्रवाहैकप्रकारतः।

नियमेनैव ससृजे भगवान् पुरुषोत्तमः।

सज्ज्ञानानन्दशीर्षोऽसौ सज्ज्ञानानन्दबाहुकः।

सज्ज्ञानानन्ददेहश्च सज्ज्ञानानन्दपादवान् ॥

एवं भूतो महाविष्णुर्यथार्थं जगदीदृशम्।

अनाद्यनन्तकालीनं ससर्जात्मेच्छया प्रभुः ॥' इति वाराहे ॥ 08 ॥

अन्धन्तमः प्रविशन्ति येऽविद्यामुपासते।

ततो भूय इव ते तमो ये उ विद्यायां रताः ॥ 09 ॥

अन्यदेवाहुर्विद्यया अन्यदाहुरविद्यया।

इति शुश्रुम धीराणां ये नस्तद् विचचक्षिरे ॥ 10 ॥

भा - 'अन्यथोपासका ये तु तमोऽन्धं यान्त्यसंशयम्। ततोऽधिकमिव व्यक्तं यान्ति तेषामनिन्दकाः ॥ तस्माद्यथास्वरूपं तु नारायणमनामयम्। अयथार्थस्य निन्दां च ........... ॥ 09-10 ॥

विद्यां चाविद्यां च यस्तद्वेदोभयं सह।

अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते ॥ 11 ॥

भा - '.................. ये विदुः सह सज्जनाः।

ते निन्दयाऽयथार्थस्य दुःखाज्ञानादिरूपिणः।

दुःखज्ञानादिसन्तीर्णाः सुखज्ञानादिरूपिणः ॥

यथार्थस्य परिज्ञानात् सुखज्ञानादिरूपताम्।

यान्त्येवं......................................... ॥ 11 ॥

अंधं तमः प्रविशन्ति येऽसम्भूतिमुपासते।

ततो भूय इव ते तमो य उ सम्भूत्यां रताः ॥ 12 ॥

अन्यदेवाहुः सम्भवादन्यदाहुरसम्भवात्।

इति शुश्रुम धीराणां ये नस्तद् विचचक्षिरे ॥ 13 ॥

भा - '.................सृष्टिकर्तृत्वं नाङ्गीकुर्वन्ति ये हरेः।

तेऽपि यान्ति तमो घोरं तथा संहारकर्तृताम्।

नाङ्गीकुर्वन्ति तेऽप्येवं तस्मात् सर्वगुणात्मकम् ॥

सर्वकर्तारमीशेशं सर्वसंहारकारकम् ॥ 12-13 ॥"

सम्भूतिं च विनाशं च यस्तद्वेदोभयं सह।

विनाशेन मृत्युं तीर्त्वा सम्भूत्याऽमृतमश्नुते ॥ 14 ॥

भा - "यो वेद संहृतिज्ञानाद्देहबन्धाद्विमुच्यते।
सुखज्ञानादिकर्तृत्वज्ञानात् तद्व्यक्तिमाव्रजेत् ॥
सर्वदोषविनिर्मुक्तं गुणरूपं जनार्दनम्।
जानीयान्न गुणानां च भागहानिं प्रकल्पयेत् ॥
न मुक्तानामपि हरेः साम्यं विष्णोरभिन्नताम्।
नैव प्रचिन्तयेत् तस्माद्ब्रह्माआदेः साम्यमेव वा ॥
मानुषादिविरिञ्चान्तं तारतम्यं विमुक्तिगम्।
ततो विष्णोः परोत्कर्षं सम्यग् ज्ञात्वा विमुच्यते ॥ इति कौर्मे ॥ 14 ॥

**हिरण्मयेन पात्रेण सत्यस्यापिहितं मुखम्।**
**तत् त्वं पूषन्नपावृणु सत्यधर्माय दृष्टये ॥ 15 ॥**

भा - "पात्रं हिरण्मयं सूर्यमण्डलं समुदाहृतम्।
विष्णोः सत्यस्य तेनैव सर्वदाऽपिहितं मुखम् ॥
तत्तु पूर्णत्वतः पूषा विष्णुर्दर्शयतिः स्वयम्।
सत्यधर्माय भक्ताय..................... ॥ 15 ॥

**पूषन्नेकर्षे यम सूर्य प्राजापत्य व्यूह रश्मीन्।**
**समूह तेजो यत् ते रूपं कल्याणतमं तत् ते पश्यामि ॥ 16 ॥**

भा - "...........................प्रधानज्ञानरूपतः।
विष्णुरेकऋषिर्ज्ञेयो यमो नियमनाद्धरिः।
सूर्यः स सूरिगम्यत्वात् प्राजापत्यः प्रजापतेः।
विशेषेणैव गम्यत्वात् ...................." ॥ 16 ॥

**योऽसावसौ पुरुषः सोऽहमस्मि ॥ 17 ॥**

भा - "...........अहं चासावहेयतः ॥

अस्मि नित्यास्तितामानात् सर्वजीवेषु संस्थितः।

स्वयं तु सर्वजीवेभ्यो व्यतिरिक्तः परो हरिः।

स क्रतुर्ज्ञानरूपत्वादग्निरङ्गप्रणेतृतः ॥ " इति ब्रह्माण्डे ॥

सत्यं ब्रह्म हृदये धारयतीति - सत्यधर्मा।

एकोऽसौ शब्दः प्राणे स्थित इति ॥ 17 ॥

**वायुरनिलममृतमथेदं भस्मान्तं शरीरम् ॥ 18 ॥**

भा - यस्मिन्नयं स्थितः सोऽप्यमृतः, किमु परः ? अः ब्रह्मैव निलयनं यस्य वायोः सोऽनिलम्।

‘अतिरोहितविज्ञानाद्वायुरप्यमृतः स्मृतः।

मख्यामृतः स्वयं रामः परमात्मा सनातनः ॥ ’

**इति रामसंहितायाम् ॥ 18 ॥**

**ओं क्रतो स्मर कृतं स्मर ओं क्रतो स्मर कृतं स्मर ॥ 19 ॥**

भा - भक्तानां स्मरणं विष्णोर्नित्यज्ञप्तिस्वरूपतः।

अनुग्रहोन्मुखत्वं तु नैवान्यत् क्वचिदिष्यते ॥ इति ब्रह्मतर्के ॥

**अग्ने न य सुपथा राये अस्मान् विश्वानि देव वयुनानि विद्वान्।**

**युयोध्यस्मज्जुहुराणमेनो भूयिष्ठां ते नम उक्तिं विधेम ॥ 20 ॥**

# ॥ इति ईशावास्योपनिषत् ॥

वयुनं - ज्ञानम्। ‘त्वद्दत्तया वयुनयेदमचष्ट विश्वम् ’ इति वचनात्। जुहुराणम् - अस्मानल्पीकुर्वत्। युयोधि - वियोजय।

‘यदस्मान् कुरुतेऽत्यल्पांस्तदेनोऽस्मद्वियोजय।

नय नो मोक्षवित्तायेत्यस्तौद् यज्ञं मनुः स्वराड्।’ इति स्कान्दे।

"युयु वियोगे" इति धातुः। भक्तिज्ञानाभ्यां भूयिष्ठां ते नम इत्युक्तिं विधेम ॥

पूर्णशक्तिचिदानन्दश्रीतेजः स्पष्टमूर्तये।

ममाभ्यधिकमित्राय नमो नारायणाय ते ॥

# ॥ इति श्रीमदानन्दतीर्थभगवत्पादाचार्य विरचितं ईशावास्योपनिषद्भाष्यम् ॥

**॥ मुख्यप्राणवशे सर्वं स विष्णोर्वशगः सदा ॥**

**॥ प्रीणयामो वासुदेवं देवतामण्डलाखण्डमण्डानम् ॥**